॥श्रीहरिः॥

वसुदेवसुतं(न्) देवं(ङ्), कंसचाणूरमर्दनम्।
देवकीपरमानन्दं(ङ्), कृष्णं(म्) वन्दे जगद्गुरुम्॥

Ver 5.0
पञ्चम संस्करण

॥ गीता पढ़ें, पढ़ायें, जीवन में लायें ॥

**गीता परिवार द्वारा श्रीमद्भगवद्गीता का शुद्ध उच्चारण सीखने हेतु**
**अनुस्वार, विसर्ग व आघात प्रयोग सहित चरणानुसार विभाग, मूल संहितापाठ के अनुकूल**

# सरल पठनीय गीता ~ पञ्चदश (15वाँ) अध्याय

Learngeeta.com

**ॐ श्रीपरमात्मने नमः**
**श्रीमद्भगवद्गीता**
**अथ पञ्चदशोऽध्यायः**

श्रीभगवानुवाच

**ऊर्ध्वमूलमधः(श्) शाखम्, अश्वत्थं(म्) प्राहुरव्ययम्।**
**छन्दांसि यस्य पर्णानि, यस्तं(म्) वेद स वेदवित्॥1॥**

**अधश्चोर्ध्वं(म्) प्रसृतास्तस्य शाखा**
**गुणप्रवृद्धा विषयप्रवालाः।**
**अधश्च मूलान्यनुसन्ततानि**
**कर्मानुबन्धीनि मनुष्यलोके॥2॥**

**न रूपमस्येह तथोपलभ्यते**
**नान्तो न चादिर्न च सम्प्रतिष्ठा।**
**अश्वत्थमेनं(म्) सुविरूढमूलम्**
**असङ्गशस्त्रेण दृढेन छित्त्वा॥3॥**

**ततः(फ्) पदं(न्) तत्परिमार्गितव्यं(म्)**
**यस्मिन्गता न निवर्तन्ति भूयः।**
**तमेव चाद्यं(म्) पुरुषं(म्) प्रपद्ये**
**यतः(फ्) प्रवृत्तिः(फ्) प्रसृता पुराणी॥4॥**

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः(स्) सुखदुःखसञ्ज्ञैः(र्)
गच्छन्त्यमूढाः(फ्) पदमव्ययं(न्) तत्॥5॥

न तद्भासयते सूर्यो, न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते, तद्धाम परमं(म्) मम॥6॥

ममैवांशो जीवलोके, जीवभूतः(स्) सनातनः।
मनः(ष्) षष्ठानीन्द्रियाणि, प्रकृतिस्थानि कर्षति॥7॥

शरीरं(म्) यदवाप्नोति, यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति, वायुर्गन्धानिवाशयात्॥8॥

श्रोत्रं(ञ्) चक्षुः(स्) स्पर्शनं(ञ्) च, रसनं(ङ्) घ्राणमेव च।
अधिष्ठाय मनश्चायं(म्), विषयानुपसेवते॥9॥

उत्क्रामन्तं(म्) स्थितं(म्) वापि, भुञ्जानं(म्) वा गुणान्वितम्।
विमूढा नानुपश्यन्ति, पश्यन्ति ज्ञानचक्षुषः॥10॥

यतन्तो योगिनश्चैनं(म्), पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो, नैनं(म्) पश्यन्त्यचेतसः॥11॥

यदादित्यगतं(न्) तेजो, जगद्भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ, तत्तेजो विद्धि मामकम्॥12॥

गामाविश्य च भूतानि, धारयाम्यहमोजसा।
पुष्णामि चौषधीः(स्) सर्वाः(स्), सोमो भूत्वा रसात्मकः॥13॥

अहं(म्) वैश्वानरो भूत्वा, प्राणिनां(न्) देहमाश्रितः।
प्राणापानसमायुक्तः(फ्), पचाम्यन्नं(ञ्) चतुर्विधम्॥14॥

सर्वस्य चाहं(म्) हृदि सन्निविष्टो
मत्तः(स्) स्मृतिर्ज्ञानमपोहनं(ञ्) च।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम्॥15॥

द्वाविमौ पुरुषौ लोके, क्षरश्चाक्षर एव च।
क्षरः(स्) सर्वाणि भूतानि, कूटस्थोऽक्षर उच्यते॥16॥

Learngeeta.com

उत्तमः(फ्) पुरुषस्त्वन्यः(फ्), परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य, बिभर्त्यव्यय ईश्वरः॥17॥

यस्मात्क्षरमतीतोऽहम्, अक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च, प्रथितः(फ्) पुरुषोत्तमः॥18॥

यो मामेवमसम्मूढो, जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां(म्), सर्वभावेन भारत॥19॥

इति गुह्यतमं(म्) शास्त्रम्, इदमुक्तं(म्) मयानघ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्, कृतकृत्यश्च भारत॥20॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां(म्) योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥

॥ ॐ श्रीकृष्णार्पणमस्तु ॥

- विसर्ग के उच्चार जहाँ (ख्) अथवा (फ्) लिखे गयें हैं, वह प्रत्यक्ष ख् अथवा फ् नहीं होते, उनका उच्चारण 'ख्' या 'फ्' के जैसा किया जाता है।
- संयुक्त वर्ण (दो व्यंजन वर्णों के संयोग) से पहले वाले अक्षर पर आघात (हल्का सा जोर) देकर पढ़ना चाहिये। '॥' का चिह्न आघात को दर्शाने हेतु दिया गया है।
- कुछ स्थानों पर स्वर के पश्चात् संयुक्त वर्ण होने पर भी अपवाद नियम के कारण आघात नहीं दिये गये हैं जैसे एक ही वर्ण के दो बार आने से, तीन व्यंजनों के संयुक्त होने से, रफार (उपर र्) या हकार आने पर आदि। जिन स्थानों पर आघात का चिह्न नहीं वहाँ बिना आघात के ही अभ्यास करें।



योगेशं(म्) सच्चिदानन्दं(म्), वासुदेवं(म्) व्रजप्रियम्।
धर्मसंस्थापकं(म्) वीरं(ङ्), कृष्णं(म्) वन्दे जगद्गुरुम्॥

LEARN GEETA
तस्मात् योगी भवार्जुन
Learngeeta.com

*गीता परिवार साहित्य का उपयोग किसी अन्य स्थान पर करने हेतु पूर्वानुमति आवश्यक है।*